हनुमदुक्त-रामोपनिषत् ।

ओं सनकाद्यो योगीन्द्रा अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनुमन्तमिदं ब्रुवन् ॥ १ ॥

आ ब्रह्मबीजदोषाच्च नाशयेत पृथक् तथा ॥ १७ ॥
पितृ-मातृ-बधोत्पन्नं बुद्धिपूर्वमघच्च यत् ।
निःशेषं नाशयेत्त्वेव राममन्त्रानुकीर्त्तनात् ॥ १८ ॥
पितृ-मातृ-स्वसृघ्नानां यद्वा विश्वास-घातिनाम् ।
यद्वा बालबधोत्पन्नं कृत्याः शस्त्रास्त्रसायकम् '?' ॥ १९ ॥
गुरुपुत्र-कलत्रादि-बधोत्पन्नमघच्च यत् ।
तदनुध्यानमात्रेण सर्वमेतद्विलीयते ॥ २० ॥
यः प्रयागादि-तीर्थेषु सर्वेषु कुरुक्षेत्रादिषु ।
सूर्य्य-नियमादि-क्रमाद् भूयः ० ० ० ० ॥ २१ ॥
स्त्रीणाञ्च पुरुषाणां स्यान्मन्त्रेणानेन दीक्षतः ॥ २२ ॥
येषु येषु विरोधेषु रामभद्रमुपासते ।
दौर्बल्यादि-भयान्येषु न भवन्ति कदाचन ॥ २३ ॥
शान्तः प्रसन्न वदनो अक्रोधो भक्तवत्सलः ।
अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते ॥ २४ ॥
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम् ।
ददात्यायुष्यमैश्वर्य्यमन्ते विष्णु-पदञ्च यत् ॥ २५ ॥
तदेतदृचाभ्युक्तं तद्विष्णोः परमं पदम् ॥ २६ ॥
स मुक्तो भवति, स मुक्तो भवति ॥ २७ ॥

इत्याथर्वण-रहस्ये रामोत्तर-तापनीयोपनिषत् समाप्ता ॥

पूर्वतापनीये साङ्गस्तारको वर्णितः । उत्तरतापनीये प्रणवस्यापि तारकत्वमुक्तम्, रामस्य परब्रह्मणः प्रणव-बीजा-

वायुपुत्र! महाबाहो! किं तत्त्वं? ब्रह्मवादिनाम्।
पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥ २ ॥
चतुर्वेदेषु शास्त्रेषु सर्वाध्यात्म-विद्यासु च।
सर्वेषु विष्ण्वभिधानेषु विघ्न-सूर्य्येश-शक्तिषु ॥ ३ ॥
एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल!।

हनुमानुवाच।

भो भो योगीन्द्रा ऋषयो विष्णुभक्तास्तथैव च ॥४॥

भ्याञ्च वाच्यत्वमुक्तम्। इदमिदानीं सन्दिह्यते, किं विघ्नराजादयः पञ्चापि तुल्यसामर्थ्या एव? आहोस्विदन्यतरस्मिन् विशेषोऽस्ति? किं श्रेष्ठं नाम? अथ के च रामस्याङ्गमन्त्राः? तथा प्रणवे गृहस्थ-ब्राह्मणानामधिकारोऽस्ति? उत यतीनामेवेति?। अधिकार-पक्षे कियांश्च प्रणवो जप्यः? कियांश्च षड़क्षरः? इति। विभीषणकृता रामस्तुतिश्च किमित्यप्रमिद्धा? कियता च पुरश्चरणेन परम-पुरुषार्थसिद्धिः? के च पुरश्चरणानुकल्पाः? इति। तदर्थं रामोपनिषदारभ्यते, आं सनकादय इति।

अस्य अनुष्टुप्छन्दः। 'अन्ये च' नारदादयः, 'ब्रुवन्' अब्रुवन्, बहुलं छन्दसीत्यमाङ्योगेऽप्यडभावः। ब्रह्मवादिनामभिमतमिति शेषः। पुराणादिषु प्रतिपाद्यं किं तत्त्वं? सर्वेषु विष्णोः 'अभिधानेषु' नामसु मध्ये किं 'तत्त्वं'? श्रेष्ठं नाम?। 'विघ्नः' गणेश्वरः 'सूर्य्यः' आदित्यः 'ईशः' रुद्रः 'शक्तिः' चण्डी, प्रकृतत्वात् विष्णुश्च, एतेषु मध्ये किं 'तत्त्वं'? परमदैवतम्?।

शृणुत मामकीं वाचं भवबन्ध-विनाशिनीम् ।
एतेषु चैव सर्वेषु तत्त्वञ्च ब्रह्म तारकम् ॥ ५ ॥
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥ ६ ॥

वायुपुत्रेणोक्ता योगीन्द्रा ऋषयो विष्णुभक्ताः पुनः पप्रच्छुर्हनुमन्तं, रामस्याङ्गान् नो ब्रूहि हनुमन् ! । स होवाच वायुपुत्रः, विघ्नं वाणीं दुर्गां क्षेत्रपालं सूर्य्यं चन्द्रं नारायणं नारसिंहं वासुदेवं वाराहम् अन्यांश्च कांश्चित् सर्वान् मन्त्रान् श्रीसीतां लक्ष्मणं हनुमन्तं शत्रुघ्नं विभीषणं सुग्रीवम् अङ्गदं जाम्बवन्तं प्रणवम् एतान् रामस्याङ्गान् जानीयात् । अङ्गान् विना रामो विघ्नकरो भवति ।

भो भो इत्यादरे वीप्सा । 'एतेषु' शास्त्रेषु तत्त्वं प्रतिपाद्यं, देवेषु तत्त्वं परमदेवतं, नामसु तत्त्वं सर्वाधिकफलं ब्रह्म तारकं, 'राम एव' श्रीराम एव तारकं ब्रह्म ।

राममन्त्रं जपता के चाङ्गमन्त्रा जप्तव्याः ? इति तृतीयं सन्देहं पृच्छन्ति, वायुपुत्रेणोक्ता इति । 'अङ्गान्' अङ्गस्थानीयान् मन्त्रान् देवांश्च ब्रूहि हे हनुमन् ! । 'वाणीं' सरस्वतीं, विघ्नादयो वाराहान्ता दशाङ्गदेवताः, अन्यांश्च कांश्चित् वशिष्ठवामदेवादीन्, अन्येषामप्राधान्य-सूचनाय सामान्यशब्दप्रयोगः । श्रीबीज-पूर्विकां सीतां, सीताशब्दं चतुर्थ्यन्तं

पुनर्वायुपुत्रेणोक्तास्ते हनुमन्तं पप्रच्छुः। आञ्जनेय! महाबल! विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यात्? इति।

पुनरुवाच हनुमान्।

अयोध्यानगरे रम्ये समासीनो रामो मया पृष्टः, सीतापते! योगि-मानस-हंस! विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यात्? इति। स होवाच रामः। येषामेष षड़क्षराधिकारो वर्त्तते, तेषां प्रणवाधिकारः स्यात्, नान्येषाम्।

स्वाहान्तं, सीतादयः प्रणवान्ता दश, एतान् रामस्य 'अङ्गान्' अङ्गमन्त्रान् जानीत। एषां प्रणवादि विन्दन्तमाद्यक्षरं वीजं. चतुर्थ्यन्तं नाम मन्त्रः। तदुक्तं डामरे।—

"आङ्कार-विन्दु-मध्यस्थं नामधेयाद्यमक्षरम्।
देवतानां स्ववीजं तत् पूजायामृद्धि-सिद्धिदम्" ॥ इति।

एतन्मन्त्रोल्लङ्घने बाधकमाह, अङ्गान् विनेति। विघ्नकारित्वे जप-पूजनादिकमेव न सिध्यति।

चतुर्थं संशयं पृच्छन्ति, आञ्जनेयेति। अञ्जनाया अपत्यम् आञ्जनेयः, तत् सम्बोधनम्। महाबलेति संशय-निराकरण-सामर्थ्यं सूचितम्। कथं स्यादिति यतीनामिव स्वातन्त्र्येण तदुपासन-विधानात्।

सीतापते! इत्यादि हनुमदुक्तं रामस्य सम्बोधनम्। येषामिति। गृहस्थ-माधूनां षड़क्षराधिकारः सम्मतिपन्नः प्रणवस्याङ्गत्वात्, तत्समान-योगक्षेमः प्रणवाधिकारः, 'नान्येषां'

प्रणवं केवलम् अकारमकार मकारमर्द्धमात्रा-सहितं जपित्वा यो रामचन्द्रमन्त्रं जपते, तस्य शुभकरोऽहं स्यात्; तस्मात् प्रणवस्य चाकारस्य चोकारस्य च मकारस्य चार्द्धमात्रस्य च ऋषि-च्छन्दो-देवताः तद्वत् वर्ण-चतुःस्थान-स्वर-वेदाग्नि-गुणादीन्युच्चार्य्य न्यासं कृत्वा प्रणवमन्त्रान् द्विगुणं जप्त्वा पश्चाद्रामममन्त्रमाद्यन्त-प्रणवं यो जपते, स रामो भवेत्, इति रामेणोक्तम्; तस्मात् रामाङ्गं प्रणवः कथित इति वायुपुत्रेणोक्ताः पुनर्हनुमन्तं पप्रच्छुः।

स होवाच हनुमान् रामभक्त-विभीषणकृत-रामपरिचर्य्यायां सप्त सहस्राणि संस्कृतवाक्यानि,

षड़क्षरेणादौचितानाम्। प्रणवजपं विना राममन्त्रजपेऽधिकार एव नास्तीत्याह, प्रणवमिति। अकारादि-चतुरक्षर-सहितमिति वक्तव्यम्। अकारादिषु पृथग्विभक्त्युच्चारणं स्वातन्त्र्येण छन्दऋष्याद्यभिधान-सूचनार्थम्। तदेवाह, तस्मादिति। एषामर्थादयोऽथर्वशिरसि, माण्डूक्ये, नारसिंहे चोक्ताः। न्यासं कृत्वा प्रणवकलोक्त-मन्त्रान् षड़क्षरान्, 'आद्यन्त-प्रणवम्' आदौ अन्ते च प्रणवोऽस्य तं, प्रणव-पुटितमित्यर्थः, 'जपते' जपति। उपसंहारः, तस्मादिति। इत्यमृतकल्पे उक्ताः। पुनः पञ्चमं संशयं पप्रच्छुरित्यन्वयः।

रामस्य भक्तो यो विभीषणः, तेन कृता 'रामपरिचर्य्या'

सप्त सहस्राणि गद्यानि, पञ्चशतान्यार्य्याः, अष्टौ सहस्राणि श्लोकाः, चतुर्विंशति-सहस्राणि पद्यानि, दश सहस्राणि दण्डकाः, इत्येवमनुक्रमं ज्ञात्वा कृतकृत्यो भवेदिति। इति हनुमदुपनिषत्।

प्रथमः खण्डः ॥ १ ॥

हनुमानुवाच।

सिंहासने समासीनं रामं पौलस्त्यसूदनम्।
प्रणम्य दण्डवद्-भूमौ पौलस्त्यो वाक्यमब्रवीत् ॥७
रघुनाथ! महाबाहो कैवल्यं कथितं मया।
अज्ञाना-मुलभञ्चैव कथनीयञ्च सौलभम् ॥ ८ ॥

रामस्तुतिः, मा विस्तरतः सम्प्रति श्रोतुमशक्या बहुत्वात्, उद्देशतस्तु वक्ष्यामीत्याशयेनाह, स होवाचेति। 'गद्यानि' संस्कृत-प्राकृत-साधारणानि, 'आर्य्या' गणच्छन्दः, 'श्लोकाः' वृत्तानि 'पद्यानि' अनुष्टुप्प्रायाः, 'दण्डका' षड्विंशत्याद्यक्षरपादाः। ननु उद्देशमात्रेण तदर्थाज्ञानात् फलासम्बन्धः? इत्याशङ्क्य फलमाह, इत्येवमिति। उद्देशेन अनुक्रमो ज्ञातः, तावतापि कृतार्थो भवेदित्यर्थः। इति हनुमदुक्तं रहस्यज्ञानम्। अति-विस्तृतत्वात् सा न सर्वजनप्रसिद्धेति भावः।

षष्ठं सन्देहं निरस्यति, हनुमानुवाचेति।

'पौलस्त्यः' पुलस्तापत्यं रावणः तस्य 'सूदनं' निरसितारम्; सूद निरसने। 'पौलस्त्यः' विभीषणः। कैवल्यमिति। यन्मया संस्कृतवाक्यादिषु कैवल्यं 'कथितं' निरूपितं, तत् 'अज्ञानानाम्'

श्रीराम उवाच।

अथ पञ्च दण्डकाः, पितृघ्नो मातृघ्नो जारो गुरुहानेककोटि-यतिघ्नोऽनेक-कृतपापो यो मम षष्ठावति-कोटि-नामानि जपते, स तेभ्यः पापेभ्यः प्रमुच्यते ; स्वयमेव सच्चिदानन्दस्वरूपो भवेन्न किम् ?।

पुनरुवाच विभीषणः। तत्राप्यशक्तो यः, स किं करोति ?। स होवाच रामः। पञ्चाशल्लक्ष-मन्मन्त्र माद्यन्त-प्रणवं मन्मन्त्राद्विगुणः प्रणवो यो जपते, स स्वयमेवाहं भवेन्न किम् ?। पुनरुवाच कार्कशेयः। तत्राप्यशक्ता ये, ते किं कुर्वन्तीति। स होवाच रामः। अथ त्रीणि पद्यानि पुरश्च-

अकृतबुद्धीनाम् 'असुलभं' दुष्प्रापं, च शब्दो हेतौ, ततः 'सौलभं' सुलभस्य ज्ञानस्य इदं कारणं सौलभं सुलभज्ञान-प्राप्तिसाधनं त्वया कथनीयमिति प्रार्थितो राम उवाच।

'अथ' शब्दः पक्षव्यावृत्त्यर्थः। पञ्च दण्डकाः पठनीयाः विभीषणोक्त-दशसहस्रेभ्य उद्धृत्य पञ्च पठनीयाः। 'जारः' गुरुतल्पगः, चतुर्न्यून-शतकोटिनामानि रामेत्यादीनि। सच्चि-दानन्दरूपः स्वयमेव किं न भवेत् ? अपि तु भवेदेव। इदं मुख्यं पुरश्चरणम्।

सप्तमं सन्देहं निरस्यन् अनुकल्पान् प्रश्नपूर्वकमाह, पुनरिति। इति। मन्मन्त्रं यो जपते इत्यन्वयः। मन्मन्त्राच्च द्विगुणः प्रणवो

रणानि, तत्राप्यशक्तो यो मम गीता मन्नामसहस्रं महिम्नरूपं मदष्टोत्तर-शताभिधानं नारदोक्तं स्तवराजं हनुमदुक्तं मन्त्रराजात्मक-स्तवञ्च सीता-स्तवञ्च राम! रक्षेत्यादिभिः स्तवैरेतैर्यो मां नित्यं स्तौति, स मत्सदृशो भवेन्न किम् इति।

द्वितीयः खण्डः ॥ २ ॥

इत्याथर्वण-रहस्ये रामोपनिषत् समाप्ता ॥ २४ ॥

सर्वोपनिषत्सारः।

ओं कथं बन्धः कथं मोक्षः काऽविद्या का विद्येति जाग्रत्-स्वप्न-सुषुप्तं तुरीयञ्च कथम् अन्न-

---

ज्ञातव्य इति शेषः। स स्वयमेव 'अहं' रामः किं न भवेत्?। पश्चान्तरं पुनरिति। कर्कशाया अपत्यं कार्कशेयः। त्रीणि 'पद्यानि' श्लोकाः, गीतादीन्यष्ट।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
असदृष्ट-पद-वाक्यानां रामोपनिषदीपिका॥
इति श्रीभट्टरत्नाकरसूनु-भट्टनारायण-विरचिता
श्रीरामोपनिषदो दीपिका सम्पूर्णा ॥ २४ ॥

ओं बन्धादिमायापर्य्यन्तं लक्षणं तैत्तिरीयके।
सर्वोपनिषदां सारः सप्तविंशे चतुर्दशे ॥ १ ॥
त्रयोविंशते-रर्थानामादौ स्वरूप-लक्षणप्रश्ने बन्धस्वरूपं